## द्वादशः पाठ

# प्रियं भारतम्



प्रकृत्या सुरम्यं विशालं प्रकामम्,

सरित्तारहारैः ललामं निकामम्।

हिमाद्रिर्ललाटे, पदे चैव सिन्धुः,

प्रियं भारतं सर्वथा दर्शनीयम्।।1।।

धनानां निधानं धरायां प्रधानम्,

इदं भारतं देवलोकेन तुल्यम्।

यशो यस्य शुभ्रं विदेशेषु गीतम्,

प्रियं भारतं तत् सदा पूजनीयम्।।2।।

अनेके प्रदेशाः अनेके च वेषाः,

अनेकानि रूपाणि भाषा अनेकाः।

परं यत्र सर्वे वयं भारतीयाः,

प्रियं भारतं तत् सदा रक्षणीयम्।।3।

।

वयं भारतीयाः स्वदेशं नमामः,

परं धर्ममेकं सदा मानयामः।

तदर्थं धनं जीवनं चार्पयामः,

प्रियं भारतं मे सदा वन्दनीयम्।।4।।

**शब्दार्थः**

**सुरम्यम्** = सुन्दर, रमणीय। **प्रकामम्** = अत्यन्त **ललामम्** = सुन्दर। **निकामम्** = अत्यधिक। **सरित्तारहारैः** = नदी रूपी उज्ज्वल हारों से। **हिमाद्रि**= हिमालय - हिम का अद्रि (पर्वत)। **ललाटे**= भाल पर। **पदे** = पद तल में।**सिन्धुः** = समुद्र। **सर्वथा** = हर तरह से। **दर्शनीयम्** = देखने योग्य।**निधानम्** = भाण्डार।**धरायाम्** = पृथ्वी पर। **शुभ्रम्** = उज्ज्वल। **अनेके** = बहुत से । **नमामः**= (हम) प्रणाम करते हैं ।**तदर्थम्** = उसके लिए।

## अभ्यासः

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

प्रकृत्या सरित्तारहारैः हिमाद्रिर्ललाटे

शुभ्रम् रक्षणीयम् चार्पयामः

**2. एकपदेन उत्तरत -**

(क) भारतस्य ललाटे किमस्ति ?

(ख) कस्य शुभ्रं यशः विदेशेषु गीतम् अस्ति ?

(ग) भारते कियन्तः वेषाः सन्ति ?

(घ) वयं भारतीयाः कं नमामः ?

**3. पूर्णवाक्येन उत्तरत -**

(क) भारते कियन्तः प्रदेशाः कियत्यश्च भाषाः सन्ति ?

(ख) इदं भारतं कस्य निधानं केन च तुल्यम् ?

(ग) वयं भारतीयाः किं किम् अर्पयामः ?

(घ) वयं सदा कं धर्मं मानयामः ?

**4. संस्कृते अनुवादं कुरुत -**

(क) प्रिय भारत सर्वथा दर्शनीय है।

(ख) भारत देवलोक के समान है।

(ग) इसमें बहुत से प्रदेश हैं ।

(घ) हम भारतीय अपने देश को प्रणाम करते हैं।

5. मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत-

**अर्पयामः देवलोकेन स्वदेशम् अनेकाः सर्वथा**

(क) प्रियं भारतं ............... दर्शनीयम्।

(ख) इदं भारतं .................... तुल्यम

(ग) अनेकानि रूपाणि, भाषा ..................... ।

(घ) वयं भारतीयाः .................... नमामः।

(ङ) तदर्थं धनं जीवनं च .......................।

**7. विशेष्यैः सह यथायोग्यं विशेषणानि योजयत -**

विशेष्यम् विशेषणम्

यथा- भारतम् अनेकाः

यशः अनेके

भाषाः प्रियम्

प्रदेशाः शुभ्रम्

**8. अनीयर् (अनीय) प्रत्ययं योजयित्वा पदानि लिखत -**

धातुः प्रत्ययः पदम्

यथा- दृश् + अनीयर् = दर्शनीयम्

पूज् + अनीयर् = ...................

पठ्+ अनीयर् = ...................

वन्द् + अनीयर् = ...................

कथ्+ अनीयर् = ...................

**शिक्षण-सङ्केतः**

*सर्वेषां श्लोकानां सस्वर-गानं कारयत।*

**एतदपि जानीत**- कुछ माप (तौल) का संस्कृत नाम-

पाव = कुडवः

सेर = सेरः, प्रस्थः

पैसा = पणः